कनकधारास्तोत्रम्

Attributed to Adi Shankara (8th century) · rashikundli.com

अङ्गं हरेः पुलकभूषणमाश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम्
अङ्गीकृताखिलविभूतिरपाङ्गलीला
माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः
मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसम्भवायाः
आमीलिताक्षमधिगम्य मुदा मुकुन्दम्–
आनन्दकन्दमनिमेषमनङ्गतन्त्रम्
आकेकरस्थितकनीनिकपक्ष्मनेत्रं
भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः
बाह्वन्तरे मधुजितः श्रितकौस्तुभे या
हारावलीव हरिनीलमयी विभाति
कामप्रदा भगवतोऽपि कटाक्षमाला
कल्याणमावहतु मे कमलालयायाः
कालाम्बुदालिललितोरसि कैटाभारेर्–
धाराधरे स्फुरति या तड़िदङ्गनेव
मातुः समस्तजगतां महनीयमूर्तिर्–
भद्राणि मे दिशतु भार्गवनन्दनायाः
प्राप्तं पदं प्रथमतः खलु यत्प्रभावान्–

माङ्गल्यभाजि मधुमाथिनि मन्मथेन

मय्यापतेत्तदिह मन्थरमीक्षणार्धं

मन्दालसं च मकरालयकन्यकायाः

विश्वामरेन्द्रपदविभ्रमदानदक्षम्–

आनन्दहेतुरधिकं मुरविद्विषोऽपि

ईषन्निषीदतु मयि क्षणमीक्षणार्धम्–

इन्दीवरोदरसहोदरमिन्दिरायाः

इष्टाविशिष्टमतयोऽपि यया दयार्द्र–

दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते

दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां

पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः

दद्याद्दयानुपवनो द्रविणाम्बुधाराम्–

अस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे

दुष्कर्मधर्ममपनीय चिराय दूरं

नारायणप्रणयिनीनयनाम्बुवाहः

गीर्देवतेति गरुड़ध्वजसुन्दरीति

शाकम्भरीति शशिशेखरवल्लभेति

सृष्टिस्थितिप्रलयकेलिषु संस्थितायै

तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै

रत्यै नमोऽस्तु रमणीयगुणार्णवायै

शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै

पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै

नमोऽस्तु नालीकनिभाननायै

नमोऽस्तु दुग्धोदधिजन्मभूत्यै

नमोऽस्तु सोमामृतसोदरायै

नमोऽस्तु नारायणवल्लभायै

नमोऽस्तु हेमाम्बुजपीठिकायै

नमोऽस्तु भूमण्डलनायिकायै

नमोऽस्तु देवादिदयापरायै

नमोऽस्तु शार्ङ्गायुधवल्लभायै

नमोऽस्तु देव्यै भृगुनन्दनायै

नमोऽस्तु विष्णोरुरसि स्थितायै

नमोऽस्तु लक्ष्म्यै कमलालयायै

नमोऽस्तु दामोदरवल्लभायै

नमोऽस्तु कान्त्यै कमलेक्षणायै

नमोऽस्तु भूत्यै भुवनप्रसूत्यै

नमोऽस्तु देवादिभिरर्चितायै

नमोऽस्तु नन्दात्मजवल्लभायै

सम्पत्कराणि सकलेन्द्रियनन्दनानि

साम्राज्यदानविभवानि सरोरुहाक्षि

त्वद्वन्दनानि दुरितोद्धरणोद्यतानि

मामेव मातरनिशं कलयन्तु मान्ये

यत्कटाक्षसमुपासनाविधिः

सेवकस्य सकलार्थसम्पदः

सन्तनोति वचनाङ्गमानसैस्–

त्वां मुरारिहृदयेश्वरीं भजे

सरसिजनिलये सरोजहस्ते

धवलतमांशुकगन्धमाल्यशोभे

भगवति हरिवल्लभे मनोज्ञे

त्रिभुवनभूतिकरि प्रसीद मह्यम्

दिग्घस्तिभिः कनककुम्भमुखावसृष्ट–

स्वर्वाहिनीविमलचारुजलप्लुताङ्गीम्

प्रातर्नमामि जगतां जननीमशेष–

लोकाधिनाथगृहिणीममृताब्धिपुत्रीम्

कमले कमलाक्षवल्लभे त्वं

करुणापूरतरङ्गितैरपाङ्गैः

अवलोकय मामकिञ्चनानां

प्रथमं पात्रमकृत्रिमं दयायाः

देवि प्रसीद जगदीश्वरि लोकमातः

कल्याणगात्रि कमलेक्षणजीवनाथे

दारिद्र्यभीतिहृदयं शरणागतं माम्–

आलोकय प्रतिदिनं सदयैरपाङ्गैः

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं

त्रयीमयीं त्रिभुवनमातरं रमाम्

गुणाधिका गुरुतरभाग्यभागिनो

भवन्ति ते भुवि बुधभाविताशयाः

इति श्रीमच्छङ्कराचार्यकृतं श्रीकनकधारास्तोत्रं सम्पूर्णम्

यह पाठ कहाँ से लिया गया है: Sanskrit Wikisource
RashiKundli संपादकीय टीम द्वारा लिखित और समीक्षित · rashikundli.com